नं० ११२२-घ

मन्युसूक्तम् (वेदांगम्)

पत्रोणि २ (द्वावेव) (सम्पूर्णम्)

नं० ११२२-घ

मन्युर्होता वरुणो जातवेदाः ॥

श्रीगणेशाय नमः ॥ हरिः ॐ ॥ यस्ते मन्योविधद्वज्र सायक सह ओजः पुष्यति
विश्वमानुषक् ॥ साह्याम दासमार्यं त्वया युजा सहस्कृतेन सहसा सहस्व
त ॥ मन्युरिंद्रो मन्युरेवास देवो मन्युर्विशा ईळते मानुषीर्याः पाहि नो
मन्यो तपसा सजोषाः ॥ अभीहि मन्यो तवसस्तवीयान्तपसा युजा वि
जहि शत्रून् ॥ १ ॥ अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या भरा त्व
न्नः ॥ त्वं हि मन्यो अभिभूत्योजा स्वयंभूर्भामो अभिमातिषाहः ॥ वि
श्वचर्षणिः सहुरिः सहावान स्मास्वोजः पृतनासु धेहि ॥ अभागः
सन्नप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः ॥ २ ॥ तं त्वा मन्यो अ

क्रतुर्जिहीळाहं स्वा तनूर्बलदेयाय मेहि ॥ अयं ते अस्म्युप मेह्यर्वाङ्
प्रतीचीनः सहुरे विश्वधायः ॥ मन्यो वज्रिन्नभि मामा ववृत्स्व हनाव द
स्यून्युत बोध्यापेः ॥ अभि प्रेहि दक्षिणतो भवा मेधा वृत्राणि जंघना
व भूरि ॥ ३ ॥ जुहोमि ते धरुणं मध्वो अग्रमुभा उपांशु प्रथमा पिबाव ॥ त्व
या मन्यो सरथमारुजंतो हर्षमाणासो धृषिता मरुत्वः ॥ तिग्मेषव आ
युधा संशिशाना अभि प्रयंतु नरो अग्निरूपाः ॥ अग्निरिव मन्यो त्विषि
तः सहस्व सेनानीर्नः सहुरे हूत एधि ॥ ४ ॥ हत्वाय शत्रून्वि भजस्व वे
द ओजो मिमानो वि मृधो नुदस्व ॥ सहस्व मन्यो अभिमातिमस्मे रुजं
वि

मृणं प्रमृणं प्रेहि शत्रून्॥ उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयस एकज त्वं॥
एको बहूनामसि मन्यवीळितो विशंविशं युधये सं शिशाधि॥ ५॥ अकृत्त
पु रुक् त्वया युजा वयं द्युमंतं घोषं विजयाय कृण्महे॥ विजेषकृदिन्द्र इवाना
वब्रवो ऽस्माकं मन्यो अधिपा भवेह॥ प्रियं ते नाम सहुरे गृ
णीमसि विद्मा तमुत्सं यत आबभूथ॥ आभूत्या सहजा वज्र सा
यक सहो बिभर्ष्यभिभूत उत्तरं॥ ६॥ क्रत्वा नो मन्यो सह मे
द्येधि महाधनस्य पुरुहूत संसृजि॥ संसृष्टं धनमुभयं समाकृतम
स्मभ्यं दत्तां वरुणश्च मन्युः॥ भियं दधाना हृदयेषु शत्रवः पराजितासो

अपानिरुयंतां ॥ ७ ॥ ज्वलनार्कप्रतीकाशं पुंजरामंडलमंडितं ॥ ब्रह्म
श्रियां विराजंतं दीप्यमानमुखांबुजं ॥ पद्मासनसमासीनं ध्यायंतं ध्यान
२ मुद्रया ॥ ध्याये ततापसं मन्युमाला। भीष्टधरं परं ॥ ॥ इति मन्युसू
क्तसमाप्तः ॥ श्री ॥ ६१ ॥